| नरककुण्डनामानि | | पापभेदात् कुण्डविशेषगामिनः | |
|---|---|---|---|
| पूयकुण्डम् | ३० | शूद्रयाजी तत्श्राद्धभक् तत्कृवदाही च ब्राह्मणः | ३० |
| सर्पकुण्डम् | ३१ | श्रीकृष्णपदचिह्नमस्तकस्य सर्पस्य हन्ता | ३१ |
| मशकुण्डम् | ३२ | विधिं दत्त्वा क्षुद्रजन्तुहन्ता | ३२ |
| दंशकुण्डम् | ३३ | विधिं दत्त्वा जीवहन्ता | ३३ |
| गरलकुण्डम् | ३४ | मक्षिकां हत्वा मधुग्राही | ३४ |
| वज्रदंष्ट्रकुण्डम् | ३५ | अदण्ड्यविप्रयोर्दण्डकृत् | ३५ |
| वृश्चिककुण्डम् | ३६ | अर्थलोभात् प्रजादण्डकृत् | ३५ |
| शरकुण्डम् | ३७ | शस्त्रधारी धावकः सन्ध्याहरिभक्तिहीनश्च ब्राह्मणः | ३७ |
| शूलकुण्डम् | ३८ | | ३८ |
| खड्गकुण्डम् | ३९ | | ३९ |
| गोलकुण्डम् | ४० | अल्पदोषेण कारायां प्रजाबन्धनकृत् | ४० |
| नक्रकुण्डम् | ४१ | जलादुत्थितनक्रादि हन्ता | ४१ |
| काककुण्डम् | ४२ | कामेन परस्त्रीवक्षःश्रोण्यास्यद्रष्टा | ४२ |
| सञ्चानकुण्डम् | ४३ | स्वर्णचौरः | ४३ |
| वाजकुण्डम् | ४४ | ताम्रलौहचौरः | ४४ |
| वज्रकुण्डम् | ४५ | देव-देवद्रव्ययोश्चौरः | ४५ |
| तप्तपाषाणकुण्डम् | ४६ | देव-द्विजयो रौप्य-गो-वस्त्राणां चौरः | ४६ |
| तीक्ष्णपाषाणकुण्डम् | ४७ | देव-द्विजयोः पित्तल-कांस्यपात्रचौरः | ४७ |
| लालाकुण्डम् | ४८ | वेश्यान्नभुक् तद्वृत्तिजीवी च | ४८ |
| मसीकुण्डम् | ४९ | म्लेच्छसेवी मसीजीवी च ब्राह्मणः | ४९ |
| चूर्णकुण्डम् | ५० | देव-द्विजयोः शस्यताम्बूलासनचौरः | ५० |
| चक्रकुण्डम् | ५१ | विप्रद्रव्यं हृत्वा चक्रकारी | ५१ |
| वक्रकुण्डम् | ५२ | विप्र-बान्धवयोर्वक्रताकारी | ५२ |
| कूर्मकुण्डम् | ५३ | हरिशयने कूर्ममांसभुक् ब्राह्मणः | ५३ |
| ज्वालाकुण्डम् | ५४ | देवद्विजयोर्घृततैलादिहृत् | ५४ |
| भस्मकुण्डम् | ५५ | | ५५ |
| दग्धकुण्डम् | ५६ | देवद्विजयोर्धात्रीगन्धतैलद्रव्याणामपहर्त्ता | ५६ |
| तप्तसूर्म्मीकुण्डम् | ५७ | बलछलतादिना परभूमिहरः | ५७ |
| असिपत्रकुण्डम् | ५८ | अर्थलोभात् खड्गेन जीवच्छेदी नरघाती च | ५८ |
| क्षुरधारकुण्डम् | ५९ | ग्रामनगरादिदाहकृत् | ५९ |

| नरककुण्डनामानि | | पापभेदात् कुण्डविशेषगामिनः | |
|---|---|---|---|
| सूचीमुखकुण्डम् | ६० | परकर्म्मणि सुखं दत्त्वा परनिन्दकः परदोषश्लाघी वेदब्राह्मणनिन्दकश्च | ६० |
| गोधामुखकुण्डम् | ६१ | गृहं भित्त्वा वस्तुगोच्छागमेषचौरः | ६१ |
| नक्रमुखकुण्डम् | ६२ | सामान्यद्रव्यचौरः | ६२ |
| गजदंशकुण्डम् | ६३ | गजतुरगनरचौरः | ६३ |
| गोमुखकुण्डम् | ६४ | जलपिबद्गोवारकः | ६४ |
| कुम्भीपाककुण्डम् | ६५ | गो-स्त्री-भिक्षु-भ्रूण-ब्रह्महा अगम्यागामी दीक्षासन्ध्याहीनस्तीर्थप्रतिग्राही ग्रामयाजी देवलः शूद्रसूपकारी वृषलीपतिश्च | ६५ |
| कालसूत्रकुण्डम् | ६६ | वेश्यान्नभुक् तत्संसर्गी च | ६६ |
| अवटोदकुण्डम् | ६७ | कुलटादिरण्डवेश्यागामी द्विजः | ६७ |
| अरुन्तुदकुण्डम् | ६८ | चन्द्रसूर्य्यग्रहणे निषिद्धकालभोजी | ६८ |
| पांशुभोजकुण्डम् | ६९ | एकस्मै वाक्प्रदत्तकन्याया अन्यस्मै दाता | ६९ |
| पाशवेष्टकुण्डम् | ७० | दत्तापहारी | ७० |
| शूलप्रोतकुण्डम् | ७१ | अभक्त्या शिवलिङ्गपूजकः | ७१ |
| प्रकम्पनकुण्डम् | ७२ | विप्रदण्डकृत् तत्कम्पकृद्भयदायी च | ७२ |
| उल्कामुखकुण्डम् | ७३ | सकोपवदना स्वामिनि कटुवादिनी | ७३ |
| अन्धकूपकुण्डम् | ७४ | शूद्रभोग्या ब्राह्मणी | ७४ |
| वेधनकुण्डम् | ७५ | वेश्या। सा च पञ्चषट्पुंगमनाद्भवति | ७५ |
| दण्डताड़नकुण्डम् | ७६ | युङ्गी। सा च सप्ताष्टपुंगमनाद्भवति | ७६ |
| जालबद्धकुण्डम् | ७७ | महावेश्या। साचाष्टाधिकपुंगमनाद्भवति | ७७ |
| देहचूर्णकुण्डम् | ७८ | कुलटा। सा च पुंद्वयगमनाद्भवति | ७८ |
| दलनकुण्डम् | ७९ | स्वैरिणी। वृषली। सा चतुःपुंगमनाद्भवति | ७९ |
| शोषणकुण्डम् | ८० | धृष्टा। पुंश्चली। सा च त्रिपुंगमनाद्भवति | ८० |
| कषकुण्डम् | ८१ | सवर्णपरदारी | ८१ |
| शूर्पकुण्डम् | ८२ | ब्राह्मणीगामी क्षत्रियो वैश्यश्च | ८२ |
| ज्वालामुखकुण्डम् | ८३ | करे तुलसीगङ्गाजलदेवशिलाश्च कृत्वा प्रतिज्ञाकृतदमालको मिथ्याशपथी मित्रद्रोही विश्वासघाती मिथ्यासाक्ष्यदश्च | ८३ |
| जिह्मकुण्डम | ८४ | नित्यक्रियाहीनो देववागनास्तिको मन्दोपहासी च | ८४ |
| धूमान्धकुण्डम् | ८५ | देवविप्रयोर्द्धनहारी | ८५ |
| नागवेष्टनकुण्डम् | ८६ | वेदादेवश्रुतिकारी लाक्षालोहव्यापारी रसादिविक्रयी च ब्राह्मणः | ८६ |

नरकजित्, पुं, (नरकं तन्नाम्ना विख्यातमसुरं जयतीति। जि+क्विप्। तुक् च।) विष्णुः। इति त्रिकाण्डशेषः॥

नरकदेवता, स्त्री, (नरकस्य अधिष्ठात्री देवता।) निरयदेवी। तत्पर्य्यायः। अलक्ष्मीः २ निर्ऋतिः ३ कालपर्णी ४। इति शब्दरत्नावली॥

नरकमुक्तः, त्रि, (नरकात् मुक्तः।) नरकागतः। यथा,—

"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते।
पतितात् प्रतिगृह्याथ खरयोनिं व्रजेद्बुधः॥
नरकात् प्रतिमुक्तस्तु कृमिर्भवति पातकी।
उपाध्यायं व्यलीकन्तु कृत्वा श्वा भवति द्विजः॥
तज्जायां मनसा वाञ्छंस्तद्द्रव्यं वाप्यसंशयम्।
गर्द्दभो जायते जन्तुर्मित्रस्यैवापमानकृत्॥
शत्रोरितरमाक्रम्य शारिका संप्रजायते।
पितरौ पीड़यित्वा तु कच्छपत्वञ्च जायते॥
भर्त्तुः पिण्डमुपाश्नन्तो हित्वान्यानि च सेवयेत्।
सोऽपि मोहसमापन्नो जायते वानरो मृतः॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः।
असूयकश्च नरकान्मुक्तो भवति राक्षसः॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते।
यवधान्यानि हृत्वा तु जायते मूषिको मृतः॥
परदाराभिमर्शात्तु वृको घोरोऽभिजायते।
भ्रातृभार्य्याप्रसङ्गेन कोकिलो जायते नरः॥
गुर्व्वादिभार्य्यागमनात् शूकरो जायते नरः।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः॥
देवतापितृविप्राणामदत्वा योऽश्नमश्नुते।
प्रमुक्तो नरकादापि वायसः स प्रजायते॥
ज्येष्ठभ्रातरमानाच्च क्रौञ्चयोनौ प्रजायते।
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत्।
कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा॥
अशस्त्रं पुरुषं हत्वा नरः संजायते खरः।
कृमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः।
हृत्वान्नश्चैव मार्ज्जारस्तिलकश्चैव मूषिकः॥
घृतं हृत्वा च नकुलः काको मद्गुरमामिषम्।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलकः॥
अपो हृत्वा तु पापात्मा वायसः संप्रजायते।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता बकस्तथा॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते।
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः॥
छुच्छुन्दरिः शुभान् गन्धान् वस्त्रं हृत्वा शशो भवेत्।
षण्ढः फलापहरणी काष्ठहृत् काष्ठकीटकः॥
पुष्पापहृद्दरिद्रस्तु पङ्गुर्यवापहृन्नरः।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः॥
गृहहृन्नरकान् गत्वा रौरवादीन् सुदारुणान्।
तृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत्॥